ॐ

# ॥ मातङ्गीस्तुतिः ॥

मातङ्गी मातरीशो मधुमदमथनाराधिते महामाये।
मोहिनि मोहप्रमथिनि मन्मथमथनप्रिये नमस्तेऽस्तु॥
स्तुतिषु तव देवि विधिरपि पिहितमतिर्भवति विहितमतिः।
तदपि तु भक्तिर्मामपि भवतीं स्तोतुं विलोभयति॥
यतिजनहृदयनिवासे वासववरदे वराङ्गि मातङ्गि।
वीणावादविनोदिनि नारदगीते नमो देवि॥
देवि प्रसीद सुन्दरि पीनस्तनि कम्बुकण्ठि घनकेशि।
मातङ्गि विद्रुमोष्ठि स्मितमुग्धाक्ष्यम्ब मौक्तिकाभरणे॥
भरणे त्रिविष्टपस्य प्रभवसि तत एव भैरवि त्वमसि।
त्वद्भक्तिलब्धविभवो भवति क्षुद्रोऽपि भुवनपतिः॥
पतितः कृपणो मूकोऽप्यम्ब भवत्याः प्रसादलेशेन।
पूज्यः सुभगो वाग्मि भवति जडश्चापि सर्वज्ञः॥
ज्ञानात्मिके जगन्मयि निरञ्जने नित्यशुद्धपदे।
निर्वाणरूपिणि शिवे त्रिपुरे शरणं प्रपन्नस्तां॥
त्वां मनसि क्षणमपि यो ध्यायति मुक्तामणिवृतां श्यामां।
तस्य जगत्रितयेऽस्मिन् कास्ता ननु याः स्त्रियोऽसाध्याः॥
साध्याक्षरेण गर्भितपञ्चनवत्यक्षराञ्चिते मातः।
भगवति मातङ्गीश्वरि नमोऽस्तुते तुभ्यं महादेवि॥
विद्याधरसुरकिन्नरगुह्यकगन्धर्वयक्षसिद्धवरैः।

आराधिते नमस्ते प्रसीद् कृपयैव मातङ्गि॥

वीणावादनवेलानर्तगलाबुस्थगितवामकुचं।

श्यामळ कोमळगात्रं पाटलनयनं स्मरामि महः॥

अवटुतटघटितचूलीताडिततालीपलाशताटङ्काम्।

वीणावादनवेलाकम्बितशिरसं नमामि मातङ्गीम्॥

माता मरतकश्यामा मातङ्गी मदशालिनी।

कटाक्षयतु कल्याणी कदम्बवनवासिनी॥

वामे विस्तृतिशालिनि स्तनतटे विन्यस्तवीणामुखं।

तन्त्रीं तारविराविणीमसकलैरास्फालयन्ती नखैः॥

अर्धोन्मीलदपाङ्गमंसवलितग्रीवं मुखं बिभ्रती।

माया काचन मोहिनी विजयते मातङ्गकन्यामयी॥

वीणावाद्यविनोद गीतनिरतां लीलाशुकोल्लासिनीं।

बिम्बोष्ठीं नवयावकार्द्रचरणामाकीर्णकेशावलिं॥

हृद्याङ्गीं सितशङ्खकुण्डलधरां श्रृङ्गारवेषोज्ज्वलां।

मातङ्गीं प्रणतोऽस्मि सुस्मितमुखीं देवीं शुकश्यामळां॥

स्रस्तं केसरदामभिः वलयितं धम्मिल्लमाबिभ्रती।

तालीपत्रपुठान्तरेषु घटितैस्ताटङ्किनी मौक्तिकैः॥

मूले कल्पतरोर्महामणिमये सिंहासने मोहिनी।

काचित् गायनदेवता विजयते वीणावती वासना॥

वेणीमूलविराजितेन्दुशकलां वीणानिनादप्रियां।

क्षोणीपालसुरेन्द्रपन्नगवरैराराधिताङ्घ्रिद्वयाम्॥

एणीचञ्चललोचनां सुवसनां वाणीं पुराणोज्ज्वलां

श्रोणीभारभरालसामनिमिषां पश्यामि विश्वेशरीं॥

मातङ्गीस्तुतिरियमन्वहं प्रजप्ता

जन्तूनां वितरति कौशलं क्रियासु।

वाग्मित्वं श्रियमधिकां च गानशक्तिं

सौभाग्यं नृपतिभिरर्चनीयतां च॥

॥ इति मन्त्रकोशे तृतीयपटलीयो मातङ्गीस्तवः सम्पूर्णः॥

॥ शुभमस्तु॥

kindly send any corrections/suggestions on this document to menonar@yahoo.com